



स्वामी दयानन्द आश्रम,
ऋषिकेश - 249137

Scan for E- BOOKS

माण्डूक्योपनिषद्

पदानुक्रम-व्युत्पत्ति-ज्ञानकोशः

# माण्डूक्योपनिषद्



## पदानुक्रम-व्युत्पत्ति-ज्ञानकोशः

# माण्डूक्योपनिषद्

## पदानुक्रम-व्युत्पत्ति-ज्ञानकोशः

हार्दिक धन्यवाद
**पूज्य स्वामी साक्षात्कृतानन्द सरस्वती**
**आचार्य राजेश्वर मिश्र**
**ब्रह्मचारी श्रीनिवासन**

जिनके सहयोग से यह कार्य सिद्ध हुआ

**श्रीमती वर्षा कजारिया**

© 2025 by the Author

All rights reserved. No part (either whole or part) may be reproduced, copied, scanned, stored in a retrieval system, recoeded or transmitted in form or by any means including but not limited to electronic and mechanical means, without the prior written permission of the author.

Website : www.paninisutra.com

Published by
Sri Gangadhareshwar Trust
Swami Dayananda Ashram
Risikesh, Uttarakhand - 249137

प्रथम संस्करण 2025
मूल्य - 250/-

पुस्तक उपलब्धि स्थान -

स्वामी दयानन्द आश्रम
मुनि की रेती,
ऋषिकेश 249137
+ 91 98430 43607

राजेश्वराचार्य जी
A-19, इन्दिरा एन्क्लेव
नेब सराय,
नई दिल्ली - 110068
+ 91 8178775405
sanskritam2005@gmail.com

ॐ
तत्सद्ब्रह्मणे नमः

# माण्डूक्योपनिषद्

## शान्तिपाठः

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिर्व्यशेमहि देवहितं यदायुः॥
ॐ शान्तिः शान्तिः शान्तिः।
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥
ॐ शान्तिः शान्तिः शान्तिः।

# ॥ प्रेरणापत्र ॥

**जीवन में दो ही आनंद हैं - ''एक है वेदांत, दूसरा है संस्कृत।''**

ऐसा मेरे गुरुजी **स्वामी प्रबुद्धानन्द जी** ने कहा था। उनसे मैंने 1992 से वेदान्त का आनन्द पूर्वक निरन्तर अध्ययन किया। क्योंकि हमारे सभी शास्त्र संस्कृत में हैं, स्वामी जी हमें संस्कृत भी सिखाते थे, परन्तु मुझे संस्कृत का बिल्कुल भी ज्ञान नहीं था। तब मैंने सोचा कि जीवन में दूसरा आनन्द भी प्राप्त करना चाहिए। पढ़ाई की कोई उम्र नहीं होती। मैंने 55 वर्ष की आयु में स्वयं के सुख के लिए संस्कृत पढ़ने की ठान ली। समाचार पत्रों में विज्ञापन दिया **लघुसिद्धान्तकौमुदी** के ज्ञाता की आवश्यकता है।

प्रभु की असीम कृपा से **आचार्य राजेश्वर मिश्र जी** मिले जो संस्कृत के पूर्ण ज्ञाता हैं। उनसे मैंने 2007 से आनन्द पूर्वक सरलता से पाणिनि के प्रत्येक सूत्रों को समझा। भगवान् श्रीकृष्ण ने साक्षात्स्वरूप से मुझे प्रेरणा दी कि मैं भगवद्गीता व उपनिषदों की धात्वर्थ-व्युत्पत्ति करूँ। तब उन सूत्रों का आधार लेकर संस्कृत प्रेमियों की सुविधा के लिए भगवद्गीता व उपनिषदों का प्रकाशन हुआ।

मेरी इष्टदेवी पहाड़ी माता की असीम अनुकम्पा से यह कार्य सिद्ध हुआ, जो आपके सामने उपस्थित है।

आशा है कि आप सब पूर्ण लाभान्वित होंगे।

धन्यवाद।
**श्रीमती वर्षा कजारिया**
वसंत पंचमी 2080

**अकारः** (मन्त्रः-8,9) अ इति वर्णात् वा - वर्णात्कारः (सि कौ वा स 2227, सि कौ सू सं 3285,) **रोगाख्यायां ण्वुल् बहुलम्** (पा. सू. 3-3-108 इत्यत्र) इति वार्तिकेन वर्णनिर्देशे कार-प्रत्ययः, ततः अकार इति । पुं.प्र.वि.ए.व. ।

**अक्षरम्** (मन्त्रः-1) अक्षरम् इत्यत्र न क्षरम्, अक्षरम् इति नञ् समासः । **नञ्** (पा.सू. 2-2-6) इति समासः, **नलोपो नञः** (पा.सू. 6-3-73) इति नस्य लोपः । क्षर इत्यत्र क्षर्-धातोः (क्षर सञ्चलने, भ्वादिः, सि.कौ.धा.सं. 851) **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** (पा.सू. 3-1-134) इति अच् । यद्वा अक्षर इत्यत्र अश्-धातोः (अशू व्याप्तौ सङ्घाते च, स्वादिः, सि.कौ.धा.सं. 1264) **अशेः सरः** (उणा.सू. 3-70) इति सरप्रत्ययः, (अश् + सर्) **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (पा.सू. 8-2-36) इति शस्य षादेशः, अष् + सर, **षढोः कः सि** (पा.सू. 8-2-41) इति षस्य कः, अक + सर, **आदेशप्रत्यययोः** (पा.सू. 8-3-59) इति प्रत्ययसस्य मूर्धन्यादेशः, अक + षर, ततः अक्षर इति। नपुं.प्र.वि.ए.व. ।

**अग्राह्यम्** (मन्त्रः-7) न ग्राहयम् अग्राह्यम् इति नञ् समासः । **नञ्** (पा.सू. 2-2-6) इति समासः, **नलोपो नञः** (पा.सू. 6-3-73) इति नस्य लोपः। नपुं.प्र.वि.ए.व. ।

**अचिन्त्यम्** (मन्त्रः-7) न चिन्त्यम् इति अचिन्त्यम् इति नञ् समासः । **नञ्** (पा.सू. 2-2-6) इति समासः, **नलोपो नञः** (पा.सू. 6-3-73) इति नस्य लोपः । चिन्त्य इत्यत्र (चिति स्मृत्याम्, भ्वादिः, सि.कौ.धा.सं. 1535) इदित्वात् **इदितो नुम्**

**धातोः** (पा.सू. 7-1-58) इति नुम्, **ऋहलोर्ण्यत्** (पा.सू. 3-1-124) इति ण्यत् । नपुं.प्र.वि.ए.व. ।

**अदृष्टम्** (मन्त्रः-7) दृष्ट इत्यत्र दृश्-धातोः (दृशिर् प्रेक्षणे, भ्वादिः, सि.कौ. - धा.सं. 988) **निष्ठा** (पा.सू. 3-2-102) इति सूत्रेण क्त-प्रत्ययः। **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (पा.सू. 8-2-36) इति षत्वम्। पूर्व इत्यत्र पूर्व्-धातोः (पूर्व पूरणे, भ्वादिः, सि.कौ. - धा.सं. 576) **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** (पा.सू. 3-1-134) इति अच् । नपुं.प्र.वि.द्वि.वि.ए.व.।

**अद्वैतः** (मन्त्रः-12) द्वैतम् यस्मिन् न विद्यते सः अद्वैतः इति लौकिकविग्रहः, बहुव्रीहिसमासः, अविद्यमान + सुँ द्वैत + सुँ इति अलौकिकविग्रहः, **अनेकमन्यपदार्थे** (पा.सू.2-2-24) इति बहुव्रीहिसमासः, **कृत्तद्धितसमासाश्च** (पा.सू. 1-2-46) इति अस्य प्रातिपदिकम्, **सुपो धातुप्रातिपदिकयोः** (पा.सू. 2-4-71) इति सुँप्रत्ययद्वयस्य लोपः, अविद्यमान + द्वैत, **वार्तिकम्- नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः** (सि कौ वा स 1369, सि कौ सू स 830, **अनेकमन्यपदार्थे** (पा. सू. 2-2-24 इत्यत्र) इति विद्यमान इत्यस्य लोपः, ततः अद्वैतम् इति. द्वैतम् इत्यत्र द्वीतस्य भावः द्वैतम् । द्वीत + ङस्, इति षष्ठ्यन्तात् **हायनान्तयुवादिभ्योऽण्** (पा. सू. 5-1-130) इति भावे अण्, द्वीत + ङस् + अण्, **कृत्तद्धितसमासाश्च** (पा सू 1-2-46) इति अस्य प्रातिपदिकसञ्ज्ञा, **सुपो धातुप्रातिपदिकयोः** (पा सू 2-4-71) इति सुप्-प्रत्ययस्य लुक्, द्वीत + अण्, **तद्धितेष्वचामादेः** (पा.सू.7.2.117 ) इति वृद्धिः, द्वैत + अ,



**यस्येति च** (पा सू 6-4-148) इति भसञ्ज्ञकस्य अकारस्य लोपः, ततः द्वैतम् इति. द्वीतम् इत्यत्र द्विधा इतम् द्विप्रकारेण इतम् इति द्वीतम् **संख्याया विधाऽर्थे धा** (पा.सू.5.3.42 ) इति द्विप्रकारे 'धा' द्वि + भ्याम् इत + सुँ इति अलौकिकविग्रहः द्विधा + इत । समासः **कृत्तद्धितसमासाश्च** (पा सू 1-2-46) इति अस्य प्रातिपदिकसञ्ज्ञा, **सुपो धातुप्रातिपदिकयोः** (पा सू 2-4-71) इति सुप्-प्रत्ययस्य लुक्, द्वि + इत, **अकः सवर्णे दीर्घः** (पा सू 1-2-46) इति दीर्घः, ततः द्वीतम् इति द्वि इत्यत्र द्वृ-धातोः (द्वृ स्थगने, भ्वादिः इति शब्दकल्पद्रुमः) इ-प्रत्ययान्तः **द्व्येकयोर्द्विवचनैकवचने** (पा.सू. 1-4-22) इत्यत्र निपातनात् सिद्धः. इतम् इत्यत्र इण्-धातोः (इण् गतौ, अदादिः, सि.कौ.धा.सं.1045) **गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजन-रुहजीर्यतिभ्यश्च** (पा.सू. 3-4-72) इति क्तप्रत्ययः, ततः इत इति । पुं.प्र.वि.ए.व. ।

**अद्वैतम्** (मन्त्रः-7) द्वैतम् यस्मिन् न विद्यते तद् अद्वैतम्।इति लौकिकविग्रहः, बहुव्रीहिसमासः। अविद्यमान + सुँ द्वैत + सुँ इति अलौकिकविग्रहः, **अनेकमन्यपदार्थे** (पा.सू.2-2-24) इति बहुव्रीहिसमासः, **कृत्तद्धितसमासाश्च** (पा.सू. 1-2-46) इति अस्य प्रातिपदिकम्, **सुपो धातुप्रातिपदिकयोः** (पा.सू. 2-4-71) इति सुँप्रत्ययद्वयस्य लोपः, अविद्यमान + द्वैत, **वार्तिकम्- नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः** (सि कौ वा स 1369, सि कौ सू स 830, **अनेकमन्यपदार्थे** (पा. सू. 2-2-24 इत्यत्र) इति विद्यमान इत्यस्य लोपः, ततः अद्वैतम् इति. द्वैतम्

इत्यत्र द्वीतस्य भावः द्वैतम् । द्वीत + ङस्, इति षष्ठ्यन्तात् **हायनान्तयुवादिभ्योऽण्** (पा. सू. 5-1-130) इति भावे अण्, द्वीत + ङस् + अण्, **कृत्तद्धितसमासाश्च** (पा सू 1-2-46) इति अस्य प्रातिपदिकसञ्ज्ञा, **सुपो धातुप्रातिपदिकयोः** (पा सू 2-4-71) इति सुप्-प्रत्ययस्य लुक्, द्वीत + अण्, **तद्धितेष्वचामादेः** (पा.सू.7.2.117 ) इति वृद्धिः, द्वैत + अ, **यस्येति च** (पा सू 6-4-148) इति भसञ्ज्ञकस्य अकारस्य लोपः, ततः द्वैतम् इति. द्वीतम् इत्यत्र द्विधा इतम् द्विप्रकारेण इतम् इति द्वीतम् **संख्याया विधाऽर्थे धा** (पा.सू.5.3.42 ) इति द्विप्रकारे 'धा' द्वि + भ्याम् इत + सुँ इति अलौकिकविग्रहः द्विधा + इत । समासः **कृत्तद्धितसमासाश्च** (पा सू 1-2-46) इति अस्य प्रातिपदिकसञ्ज्ञा, **सुपो धातुप्रातिपदिकयोः** (पा सू 2-4-71) इति सुप्-प्रत्ययस्य लुक्, द्वि + इत, **अकः सवर्णे दीर्घः** (पा सू 1-2-46) इति दीर्घः, ततः द्वीतम् इति द्वि इत्यत्र द्वृ-धातोः (द्वृ स्थगने, भ्वादिः इति शब्दकल्पद्रुमः) इ-प्रत्ययान्तः **द्व्येकयोर्द्विवचनैकवचने** (पा.सू. 1-4-22) इत्यत्र निपातनात् सिद्धः. इतम् इत्यत्र इण्-धातोः (इण् गतौ, अदादिः, सि.कौ.धा.सं.1045) **गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजन-रुहजीर्यतिभ्यश्च** (पा.सू. 3-4-72) इति क्तप्रत्ययः, ततः इत इति । नपुं.प्र. वि.ए.व. ।

**अधिमात्रम्** (मन्त्रः-8) मात्रायां मात्राम् अधिकृत्य वा इति अध्यात्मम् (अव्ययीभावसमासः) । (मात्रा + ङि अधि) इत्यत्र **अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भाव-**



**पश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु** (पा.सू. 2-1-6) इति सूत्रेण अव्ययीभाव-समासः, अस्वपदविग्रहः (मात्रा + ङि) + अधि, **प्रथमानिर्दिष्टं समास उपसर्जनम्** (पा. सू. 1-2-43) तथा **उपसर्जनम् पूर्वम्** (पा सू 2-2-60) इति आभ्याम् सूत्राभ्याम् अव्ययस्य अधेः पूर्वनिपातः, अधि + (मात्रा + ङि), **कृत्तद्धितसमासाश्च** (पा. सू. 1-2-46) इति अस्य प्रातिपदिकसञ्ज्ञा, **सुपो धातु प्रातिपदिकयोः** (पा.सू. 2-4-71) इति ङेः लुक्, अधिमात्रा, एकदेशविकृतस्य अनन्यत्वाद् इति न्यायेन अस्य प्रातिपदिकसञ्ज्ञा निर्बाधः, **अव्ययीभावश्च** (पा. सू. 1-1-41) इति अव्ययसञ्ज्ञा अपि, **अव्ययीभावश्च** (पा. सू. 2-4-18) इति अस्य नपुंसकलिङ्गः च, अतः **ह्रस्वो नपुंसके प्रातिपदिकस्य** (पा. सू. 1-2-47) इति ह्रस्वः, अधिमात्र, तस्मात् स्वादयः अधिमात्र + सुँ, **नाव्ययीभावादतोऽम्त्वपञ्चम्याः** (पा. सू. 2-4-83 ) इति अव्ययसञ्ज्ञकात् विहितसुपः अम्, **अमि पूर्वः** (पा सू 6-1-107) इति पूर्वरूपम्, ततः अधिमात्रम् इति सिद्ध्यति । अव्ययम् ।

**अध्यक्षरम्** (मन्त्रः-8) अक्षरे इति अध्यात्मम् (अव्ययीभावसमासः) (अक्षर + ङि अधि) इत्यत्र **अव्ययं विभक्तिसमीपसमृद्धि-व्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्य-यौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु** (पा.सू. 2-1-6) इति सूत्रेण अव्ययीभाव-समासः, अस्वपदविग्रहः (अक्षर + ङि) + अधि, **प्रथमानिर्दिष्टं समास उपसर्जनम्** (पा.सू. 1-2-43) तथा **उपसर्जनम् पूर्वम्** (पा. सू. 2-2-60) इति आभ्याम्

सूत्राभ्याम् अव्ययस्य अधेः पूर्वनिपातः, अधि + (अक्षर + ङि), **कृत्तद्धितसमासाश्च** (पा. सू. 1-2-46) इति अस्य प्रातिपदिकसञ्ज्ञा, **सुपो धातुप्रातिपदिकयोः** (पा सू 2-4-71) इति ङेः लुक्, **इको यणचि** (पा. सू. 6-1-77) इति यण्, अध्यक्षर, एकदेशविकृतस्य अनन्यत्वाद् इति न्यायेन अस्य प्रातिपदिकसञ्ज्ञा निर्बाधः, **अव्ययीभावश्च** (पा. सू. 1-1-41) इति अव्ययसञ्ज्ञा अपि, तस्मात् स्वादयः अध्यक्षर + सुँ, **नाव्ययीभावादतोऽम्त्वपञ्चम्याः** (पा. सू. 2-4-83 ) इति अव्ययसञ्ज्ञकात् विहितसुपः अम्, **अमि पूर्वः** (पा. सू. 6-1-107) इति पूर्वरूपम्, ततः अध्यक्षरम् इति सिद्ध्यति । अक्षरम् इत्यत्र न क्षरम्, अक्षरम् इति नञ् समासः । **नञ्** (पा.सू. 2-2-6) इति समासः, **नलोपो नञः** (पा.सू. 6-3-73) इति नस्य लोपः । क्षर इत्यत्र क्षर्-धातोः (क्षर सञ्चलने, भ्वादिः, सि.कौ.धा.सं. 851) **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** (पा.सू. 3-1-134) इति अच् । यद्वा अक्षर इत्यत्र अश्-धातोः (अशू व्याप्तौ सङ्घाते च, स्वादिः, सि.कौ.धा.सं. 1264) **अशेः सरः** (उणा.सू. 3-70) इति सरप्रत्ययः, (अश् + सर्) **व्रश्चभ्रस्जसृजमृजयजराज-भ्राजच्छशां षः** (पा.सू. 8-2-36) इति शस्य षादेशः, अष् + सर, **षढोः कः सि** (पा.सू. 8-2-41) इति षस्य कः, अक + सर, **आदेशप्रत्यययोः** (पा.सू. 8-3-59) इति प्रत्ययसस्य मूर्धन्यादेशः, अक + षर, ततः अक्षर इति। अव्ययम्।



**अन्तः प्रज्ञः** (मन्त्रः-4) अन्तः प्रज्ञः यस्य सः अन्तः प्रज्ञः इति लौकिकविग्रहः अन्तर् + सुँ प्रज्ञ + सुँ इति अलौकिकविग्रहः, **अनेकमन्यपदार्थे** (पा.सू.2-2-24) इति बहुव्रीहिसमासः, **कृत्तद्धितसमासाश्च** (पा.सू. 1-2-46) इति अस्य प्रातिपदिकम्, **सुपो धातुप्रातिपदिकयोः** (पा.सू. 2-4-71) इति सुप्रत्ययस्य लुक्, अन्यपदानुसारम् अस्य लिङ्गम्, **खरवसानयोर्विसर्जनीयः** (पा.सू.8.3.15 ) इति रेफस्य विसर्गः, **कुप्वोः ःक ःपौ च** (पा.सू.8.3.37) इति, विसर्गस्य वैकल्पिकः विसर्गः, ततः अन्तःप्रज्ञः इति अन्तर् इत्यत्र अम्-धातोः (अमँ गतौ शब्दे सम्भक्तौ च, भ्वादिः,सि.कौ.धा.सं. 465) **अमेस्तुट् च** (उणा. सू. 5 60) इति अरन्-प्रत्ययः, प्रत्ययस्य तुडागमश्च, (अम् + तुट् अरन्), इत्वर्णानाम् लोपः, अम् + तर्, **नश्चापदान्तस्य झलि** (पा.सू. 8-4-24) इति मकारस्य अनुस्वारः, **अनुस्वारस्य ययि परसवर्णः** (पा.सू.8.4.58) इति अनुस्वारस्य नकारः, ततः अन्तर् इति, स्वरादिगणे पठितोऽयम् शब्दः, अतः **स्वरादिनिपातमव्ययम्** (पा.सू. 1-1-37) इति अव्ययम् । प्रज्ञ इत्यत्र प्रपूर्वकाद् ज्ञाधातोः (ज्ञा अवबोधने, क्र्यादिः, सि.कौ.धा.सं. 1507) **आतश्चोपसर्गे** (पा.सू.3.1.136) इति क-प्रत्ययः, **आतो लोप इटि च** (पा.सू. 6-4-64) इति आ-लोपः, ततः प्रज्ञ इति । पुं.प्र.वि.ए.व. ।

**अन्तः प्रज्ञम्** (मन्त्रः- 7) अन्तः प्रज्ञः यस्य तद् अन्तःप्रज्ञम् इति लौकिकविग्रहः अन्तर् + सुँ प्रज्ञ + सुँ इति अलौकिकविग्रहः, **अनेकमन्यपदार्थे** (पा.सू.2-2-24) इति बहुव्रीहिसमासः, **कृत्तद्धितसमासाश्च** (पा.सू. 1-2-46) इति अस्य प्रातिपदिकम्,

**सुपो धातुप्रातिपदिकयोः** (पा.सू. 2-4-71) इति सुप्रत्ययस्य लुक्, अन्यपदानुसारम् अस्य लिङ्गम्, **खरवसानयोर्विसर्जनीयः** (पा.सू. 8.3.15) इति रेफस्य विसर्गः, **कुप्वोः :क :पौ च** (पा.सू.8.3.37) इति, विसर्गस्य वैकल्पिकः विसर्गः, ततः अन्तःप्रज्ञः इति । अन्तर् इत्यत्र अम्-धातोः (अमँ गतौ शब्दे सम्भक्तौ च, भ्वादिः,सि.कौ.धा.सं. 465) **अमेस्तुट् च** (उणा सू 5 60) इति अरन्-प्रत्ययः, प्रत्ययस्य तुडागमश्च, (अम् + तुट् अरन्), इत्वर्णानाम् लोपः, अम् + तर्, **नश्चापदान्तस्य झलि** (पा.सू. 8-4-24) इति मकारस्य अनुस्वारः, **अनुस्वारस्य यथि परसवर्णः** (पा.सू. 8.4.58 ) इति अनुस्वारस्य नकारः, ततः अन्तर् इति, स्वरादिगणे पठितोऽयम् शब्दः, अतः **स्वरादिनिपातमव्ययम्** (पा.सू. 1-1-37) इति अव्ययम् । प्रज्ञ इत्यत्र प्रपूर्वकाद् ज्ञाधातोः (ज्ञा अवबोधने, क्र्यादिः, सि.कौ.धा.सं. 1507) **आतश्चोपसर्गे** (पा.सू.3.1.136 ) इति क-प्रत्ययः, **आतो लोप इटि च** (पा.सू. 6-4-64) इति आ-लोपः, ततः प्रज्ञ इति । नपुं.प्र.वि.ए.व.।

**अन्तर्यामी** (मन्त्रः- 6) अन्तर् यमयति इति अन्तर्यामी इति लौकिकविग्रहः । अन्तर्यामिन् + सुँ, **सर्वनामस्थाने चासम्बुद्धौ** (पा.सू. 6-4-8) इति अङ्गस्य उपधायाः दीर्घः, **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (पा.सू. 6-1-68) इति सुलोपः, **नलोपः प्रातिपदिकान्तस्य** (पा.सू. 8-2-7) इति नलोपः, अन्तर् उपपदे णिजन्त-यामिधातोः **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** (पा.सू.3.1.134 ) इति धातोः णिनि-प्रत्ययः **णेरनिटि** (पा.सू.6.4.51 ) इति णिचः लोपः, ततः यामिन् इति । यामि



इत्यत्र यम्-धातोः(यमँ उपरमे, भ्वादिः, सि कौ धा सं-984), **हेतुमति च** (पा.सू.3.1.26 ) इति णिच्, **अत उपधायाः** (पा.सू.7.2.116) इति वृद्धिः, ततः यामि इति, अस्य **सनाद्यन्ता धातवः** (पा.सू.3.1.32) इति धातुसञ्ज्ञा, अन्तर् इत्यत्र अम्-धातोः (अमँ गतौ शब्दे सम्भक्तौ च, भ्वादिः,सि.कौ.धा.सं. 465) **अमेस्तुट् च** (उणा सू 5 60) इति अरन्-प्रत्ययः, प्रत्ययस्य तुडागमश्च, (अम् + तुट् अरन्), इत्वर्णानाम् लोपः, अम् + तर्, **नश्चापदान्तस्य झलि** (पा.सू. 8-4-24) इति मकारस्य अनुस्वारः, **अनुस्वारस्य यथि परसवर्णः** (पा.सू.8.4.58 ) इति अनुस्वारस्य नकारः, ततः अन्तर् इति, स्वरादिगणे पठितोऽयम् शब्दः, अतः **स्वरादिनिपातमव्ययम्** (पा.सू. 1-1-37) इति अव्ययम् । अन्तर् इत्यत्र अम्-धातोः (अमँ गतौ शब्दे सम्भक्तौ च, भ्वादिः,सि.कौ.धा.सं. 465) **अमेस्तुट् च** (उणा सू 5 60) इति अरन्-प्रत्ययः, प्रत्ययस्य तुडागमश्च, (अम् + तुट् अरन्), इत्वर्णानाम् लोपः, अम् + तर्, **मोऽनुस्वारः** (पा.सू.8.3.23 ) इति अनुस्वारः, **अनुस्वारस्य यथि परसवर्णः** (पा.सू.8.4.58 ) इति अनुस्वारस्य नकारः, ततः अन्तर् इति अव्ययम् । पुं.प्र.वि.ए.व.।

**अन्यत्** (मन्त्रः- 1) अन्यत् (2-31,42, 7-2,7, 11-7) अन्य सु, **अद्ड्डतरादिभ्यः पञ्चभ्यः** (पा.सू. 7-1-25) इति सु-स्थाने अद्ड्-आदेशः। अन्य इत्यत्र अन्-धातोः (अन प्राणने, अदादिः, सि.कौ.धा.सं.1070) **अघ्न्यादयश्च** (उणा.सू. 111) इति सूत्रेण यक्-प्रत्ययः. अन्यत् इति अव्ययमपि वर्तते । नपुं.प्र.वि.ए.व.।

**अपि** (मन्त्रः- 1) शब्दोऽयम् प्रादिगणपठितत्वात् **प्रादयः** (पा.सू.1-4-58) इति निपातसञ्ज्ञकः, अतः **स्वरादिनिपातमव्ययम्** (पा.सू. 1-1-37) इति अव्ययम् । अव्ययम् ।

**अपीतिः** (मन्त्रः- 11) अपि + इतिः **अकः सवर्णे दीर्घः** (पा.सू. 6-1-101) इति दीर्घः । इतिः इत्यत्र इण्- धातोः (इण् गतौ, अदादिः, सि.कौ.धा.सं.-1045), **स्त्रियां क्तिन्** (पा.सू. 3-3-94) इति क्तिन्-प्रत्ययः, **सार्वधातुकार्धातुकयोः** (पा.सू. 7-3-84) इति प्राप्तः गुणः, **क्ङिति च** (पा.सू. 1-1-5) इति तस्य निषेधः । स्त्री.प्र.वि.ए.व. ।

**अपीतेः** (मन्त्रः- 11) अपीति + ङसि इत्यत्र अङ्गस्य **शेषो घ्यसखि** (पा.सू. 1-4-7) इति घिसञ्ज्ञा, **घेर्ङिति** (पा.सू. 7-3-111) इति तस्य गुणः, अपीते + ङसि, **ङसिङसोश्च** (पा.सू. 6-1-110) इति पूर्वरूपम्, अपीते + स्, **ससजुषो रुः** (पा.सू. 8-2-66) इति सकारस्य रुः, रोः **खरवसानयोर्विसर्जनीयः** (पा.सू.8-3-15) इति विसर्गः । स्त्री.पं.वि.ए.व. ।

**अब्रह्मविद्** (मन्त्रः- 10) अब्रह्मविद् + सुँ, **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (पा.सू. 6-1-68) इति सुँलोपः । न ब्रह्मविद् अब्रह्मविद् इति समासः । **नञ्** (पा.सू. 2-2-6) इति समासः, **नलोपो नञः** (पा.सू. 6-3-73) इति नस्य लोपः । ब्रह्म वेत्ति इति ब्रह्मविद् ब्रह्म इति उपपदम्, **तत्रोपपदं सप्तमीस्थम्** (पा.सू.3-1-92), उपपदस्य पूर्वनिपातः, **क्विप् च** (पा.सू. 3-2-76) इति सोपपदाद् विद्-धातोः (विद ज्ञाने, अदादिः, सि कौ धा सं-1064) क्विप्, कर्मभूतस्य ब्रह्म इत्यस्य **कर्तृकर्मणोः कृति** (पा.सू.2-3-65) इत्यनेन षष्ठ्यन्तम्, (ब्रह्मन् + ङस् विद् + क्विप्), **पुगन्तलघूपधस्य च** (पा.सू. 7-3-86) इति प्राप्तः गुणः, **क्ङिति च** (पा.सू. 1-1-5) इति तस्य निषेधः, क्विपः सर्वलोपः, **हलन्त्यम्** (पा.सू. 1-3-3) इति पकारस्य, **उपदेशेऽजनुनासिक इत्** (पा.सू. 1-3-2) इति इकारस्य, **लशक्वतद्धिते** (पा.सू. 1-3-8) इति ककारस्य च इत्संज्ञा, **तस्य लोपः** (पा.सू. 1-3-9) इति इत्संज्ञकानां लोपः, **वेरपृक्तस्य** (पा.सू. 6-1-67) इति वलोपः, (ब्रह्मन् + ङस् विद्), अत्र **उपपदमतिङ्** (पा.सू.2-2-19) इति नित्यसमासः, अस्यैव समासस्य **कृत्तद्धितसमासाश्च** (पा.सू.1-2-46) इति प्रातिपदिकसञ्ज्ञा, **सुपो धातुप्रातिपदिकयोः** (पा.सू.2-4-71) इति ङस्-प्रत्ययस्य लुक्, (ब्रह्मन् + ङस् विद्), ततः ब्रह्मविद् इति सिद्धिः। पुं.प्र. वि.ए.व. ।

**अमात्रः** (मन्त्रः- 12) अमात्र + सुँ, **ससजुषो रुः** (पा.सू.8-2-66) इति पदान्तसकारस्य रुः, रोः **खरवसानयोर्विसर्जनीयः** (पा.सू.8-3-15) इति विसर्गः अमात्र इत्यत्र अविद्यमान + सुँ मात्रा + सुँ इति अलौकिकविग्रहः, **अनेकमन्यपदार्थे** (पा.सू.2-2-24) इति बहुव्रीहिसमासः, **कृत्तद्धितसमासाश्च** (पा.सू. 1-2-46) इति अस्य प्रातिपदिकम्, **सुपो धातुप्रातिपदिकयोः** (पा.सू. 2-4-71) इति सुँप्रत्ययद्वयस्य लोपः, अविद्यमान + मात्रा, **वार्तिकम् - नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः** (सि कौ वा स 1369, सि कौ सू स 830) **अनेकमन्यपदार्थे** (पा. सू. 2-2-24 इत्यत्र) इति विद्यमान इत्यस्य लोपः, अ +

**Want to read more?**

Get full access by purchasing the complete book.

Buy Now
Secured by Razorpay

**Or contact us directly:**

**Rajeshwaracharya Ji**
A19, Indira Enclave, Neb Sarai, New Delhi – 110068
Mobile: +91 81787 75405

**Swami Dayanand Ashram**
Muni Ki Raiti, Rishikesh – 249137, Uttarakhand
Mobile: +91 98430 43607